२५ अ० वराहमिहिरेणोक्ताः प्रदर्श्यन्ते । "राशिप्रभेदो ग्रहयोनिभेदो वियोनिजन्माथ निषेककालः । जन्माथ सद्योमरणं तथायुर्दशाविपाकोऽष्टकवर्गसंज्ञः । कर्म्माजीवो राजयोगाः खयोगाश्चान्द्रा योगा द्विग्रहाद्याश्च योगाः । प्रव्रज्याथो राशिशीलानि दृष्टिर्भावस्तस्मादाश्रयोऽथ प्रकीर्णः । नेष्टा योगा जातकं कामिनीनां निर्याणं स्यान्नष्टजन्मद्रेक्काणाः । अत्राध्याया विंशतिः पञ्चयुक्ता जन्मन्येतद्यात्रिकं चाभिधास्ये" ।

"राशिप्रभेदः प्रथमेऽध्याये । ग्रहयोनिभेदः द्वितीये वियोनिजन्म तृतीये । निषेककालश्चतुर्थे । जन्मविधिः पञ्चमे । सद्योमरणं षष्ठे । आयुर्विभागः सप्तमे । दशाविभागोऽष्टमे । अष्टकवर्गो नवमे । कर्म्माजीवो दशमे । राजयोगा एकादशे । खयोगाः (नाभसयोगाः) द्वादशे । चान्द्रयोगाः सुनफाद्याश्चन्द्रयोगास्त्रयोदशे द्विग्रहत्रिग्रहयोगाश्चतुर्द्दशे । प्रव्रज्यायोगा पञ्चदशे । राशिशीलम् षोड़शे । दृष्टिफलं सप्तदशे । भावफलमष्टादशे । आश्रय एकोनविंशतितमे । प्रकीर्णफलम् विंशतितमे । अनिष्टयोगा एकविंशे । कामिनीनां (स्त्रीणां) जातकं द्वाविंशे । निर्याणं (मरणं) तच्चिह्नपणं त्रयोविंशे । नष्टजातकं चतुर्विंशे । द्रेक्काणस्वरूपादि पञ्चविंशे । एवं पञ्चयुक्ताध्यायानां विंशतिर्जन्मनि जातके कथिता एतज्जातके उक्ताः ।

जन्मफलं पञ्चमे उक्तं यथा

"पितुर्जातः परोक्षस्य लग्नमिन्दावपश्यति । विदेशस्थस्य चरभे मध्याद्भ्रष्टे दिवाकरे । उदयस्थेऽपि वा मन्दे कुजे वास्तं ७ समागते । स्थिते वान्तःक्षपानाथे शशाङ्कसुतशुक्रयोः । शशाङ्के पापलग्ने वा वृश्चिकेऽंशत्रिभागगे । शुभैः स्वायस्थितैर्जातः सर्पस्तद्वेष्टितोऽपि वा । चतुष्पदगते भानौ शेषैर्वीर्य्यसमन्वितैः । द्वितनुस्थैश्च यमलौ भवतः कोशवेष्टितौ । छागसिंहवृषैर्लग्ने तत्स्थे सौरेऽथवा कुजे । राश्यंशसदृशं गात्रं जायते नालवेष्टितः । न लग्नमिन्दुञ्च गुरुर्निरीक्षते न वा शशाङ्कं रविणा समागतम् । सपापकोऽर्केण युतोऽथवा शशी परेण जातं प्रवदन्ति निश्चयात् । क्रूरर्क्षगतावशोभनौ सूर्य्याद्द्यूननवात्मजस्थितौ । बद्धस्तु पिता विदेशगः स्वे वा राशिवशादथो पथि । पूर्णे शशिनि स्वराशिगे सौम्ये लग्नगते शुभे सुखे४ । लग्ने जलजेऽस्तगेऽपि वा चन्द्रे पोतगता प्रसूयते । आप्योदयमाप्यगः शशी संपूर्णः समवेक्षतेऽथ वा । मेषूरणबन्धुलग्नगः स्यात् सूतिः सलिले न संशयः । उदयोडुपयोर्व्ययस्थिते गुप्त्यां पापनिरीक्षिते यमे । अलिकर्किंयुते विलग्नगे सौरे शीतकरेक्षितेऽवटे । मन्देऽजगते विलग्नगे बुधसूर्य्येन्दुनिरीक्षिते क्रमात् । क्रीडाभवने सुरालये सोषरभूमिषु च प्रसूयते । नृलग्नगं प्रेक्ष्य कुजः श्मशाने रम्ये सितेन्दू गुरुरग्निहोत्रे । रविर्नरेन्द्रामरगोकुलेषु शिल्पालये ज्ञः प्रसवं करोति । राश्यंशसमानगोचरे मार्गे जन्मचरे स्थिरे गृहे । स्वर्क्षांशगते स्वमन्दिरे बलयोगात् फलमंशकर्क्षयोः । आरार्कजयोस्त्रिकोणगे चन्द्रेऽस्ते च विसृज्यतेऽम्बया । दृष्टेऽमरराजमन्त्रिणा दीर्घायुः सुखभाक् च स स्मृतः । पापेक्षिते तुहिनगावुदये कुजेऽस्ते त्यक्तो विनश्यति कुजार्कजयोस्तथाये सौम्येऽपि पश्यति तथाविधहस्तमेति सौम्येतरेषु परहस्तगतोऽप्यनायुः । पितृमातृगृहेषु तद्बलात्तरुशालादिषु नीचगैः शुभैः । यदि नैकगतौ तु वीक्षितौ लग्नेन्दू विजने प्रसूयते । मन्दर्क्षांशे शशिनि हिबुके मन्ददृष्टेऽब्जगे वा तद्युक्ते वा तमसि शयने नीचसंस्थैश्च भूमौ । यद्वद्राशिं व्रजति हरिजं गर्भमोक्षस्तु तद्वत्पापैश्चन्द्रात् स्मरसुखगतैः क्लेशमाहुर्जनन्याः । स्नेहः शशाङ्कादुदयाच्च वर्त्तिर्दीपोऽर्कयुक्तर्क्षवशाच्चराद्यः । द्वारं च तद्वास्तुनि केन्द्रसंस्थैर्ज्ञेयं ग्रहैर्वीर्य्यसमन्वितैर्वा । जीर्णं संस्कृतमर्कजे क्षितिसुते दग्धं नवं शीतगौ काष्ठाढ्यं न दृढं रवौ शशिसुते तन्नैकशिल्प्युद्भवम् । रम्यं चित्रयुतं नवं च भृगुजे जीवे दृढं मन्दिरं चक्रस्थैश्च यथोपदेशरचनां सामन्तपूर्वां वदेत् । मेषकुलीरतुलालिघटैः प्रागुत्तरतो गुरुसौम्यगृहेषु । पश्चिमतश्च वृषेण निवासो दक्षिणभागकरौ मृगसिंहौ । प्राच्यादिगृहक्रियादयो द्वौ द्वौ कोणगता द्विमूर्त्तयः । शय्यास्वपि वास्तुवद्वदेत् त्र्याद्यैः षट्त्रिनवान्त्यसंस्थितैः । चन्द्रलग्नान्तरगतैर्ग्रहैः स्युरुपसूतिकाः । बहिरन्तश्च चक्रार्द्धे दृश्यादृश्येऽन्यथा परे । लग्ननवांशपतुल्यतनुः स्याद्वीर्य्ययुतग्रहतुल्यतनुर्वा । चन्द्रसमेतनवांशपवर्णः कादिविलग्नविभक्तभगात्रः । कं दृक् श्रोत्रनसा कपोलहनवो वक्त्रञ्च होरादयस्ते कण्ठांसकबाहुपार्श्वहृदयं क्रोड़ानि नाभिस्ततः । वस्तिः शिश्नगुदे ततश्च वृषणावूरू ततो जानुनी । जङ्घाङ्घ्री इत्युभयत्र वाममुदितैर्द्रेक्काणभागैस्त्रिधा । तस्मिन् पापयुते व्रणं शुभयुते दृष्टे च लक्ष्मादिशेत् स्वर्क्षांशे स्थिरसंयुते च सहजः स्यादन्यथाऽऽगन्तुकः । मन्देऽश्मानिलजोऽग्निशस्त्रविषजो भौमे बुधे भूभवः सूर्य्ये काष्ठचतुष्पदेषु हिमगौ